International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(1): 243-246
© 2026 IJMH
www.themultijournal.com

Received: 11-02-2026
Accepted: 25-02-2026
Publish : 27-02-2026

दुर्योधन रणा
शोधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

Correspondence:
दुर्योधन रणा
शोधच्छात्रः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः, आन्ध्रप्रदेशः

मनुस्मृतौ वैदिकसंस्कृतेः संरक्षणं लोकोपयोगिता च

दुर्योधन रणा

शोधसारः

श्रुत्युक्तधर्मो याज्ञिकक्रियाविधिदैवतवादसिद्धान्ताध्यात्मिकाधिभौतिकादितत्त्वैः सदैव प्रवर्तते यश्च वैदिकसंस्कृतेर्विशेष्यत्वं वर्तते तत्सर्वं स्मार्त्तकर्मणि आचारादिमार्गैर्बहुधा विन्यासो दृश्यते, यश्च षड्विधरूपेण तत्र वर्णधर्माश्रमधर्मवर्णाश्रमधर्मगुणधर्मनिमित्तधर्मसाधरणधर्मेति बहुधा प्रतिपत्तिर्घटते। वैदिकसंस्कृतिः यागपरकं यच्च स्मार्त्तक्रियाविधावपि बहुधा लोके साम्प्रतिककर्मणि उपयुज्यते। यश्च क्रियाविधिः याज्ञिककर्मणि ईदानीं दरीदृश्यते तत्सर्वं स्मार्त्तविधावपि प्रतिपत्तिं जनयति। अस्यामपि संस्कृतौ आचारः परमो धर्मो यत्र नैतिकता सदाचारत्वमहिंसाऽऽदिनैतिककर्मणि विधिवत्प्रवर्तते। यतः स्मृतिशास्त्रमेतेषामेव धर्मे प्रामाण्यमिति बहुधा प्रतिपादयति। अतः अस्यामपि संस्कृतौ तादृशी भावना वर्तते यथा वैदिकसंस्कृतौ सारवद् रूपेण प्राप्यते। विश्वस्यास्यादिमसंस्कृतिर्वैदिकसंस्कृतिरिति तदनुगतरीत्या अस्याः संस्कृतेः पारम्परिकरहस्यं बहुधा प्रवर्तते। वेदेषु प्रथितानां नैकसिद्धान्तानां विधिवद् विस्तारो दृश्यते स्मृतिशास्त्रे। श्राद्धदानदैवतप्रायश्चित्तादिकर्माणि सुतरां स्मृतिशास्त्रे वैदिकशब्दविन्यासस्य प्राचुर्यतां विन्दति। विश्वबन्धुत्वं दानमहिंसाशीलमाध्यात्मिकतां प्रति वैदिकसंस्कृतिः सुतरामन्वेति। सा संस्कृतिः विश्वस्यादिमसंस्कृतिरिति प्रशस्तिः जेगीयते। तदाधारेण स्मार्त्तक्रियाविधौ आचारादिनैतिकमार्गाणां सुष्ठु समायोजनं भवति। वैदिकसंस्कृतेः संरक्षणं परियोजनं क्रियान्वयनञ्च स्मार्त्तकर्मणि बहुधा अवलोक्यते। स्मृतिशास्त्रेषु मनुस्मृतिरेव सर्वकर्मणां वैदिकधर्माणां यथाविधिः संस्काराणां मानवीयक्रियाविधीनां गृहस्थादिधर्माणां लोकेषु वैदिकसंस्कृतेरनुगुणं बहुधा प्रतिपादयामास। अतो अत्रोक्ताचारव्यवहारप्रायश्चित्तश्राद्धदानराजधर्मादित्वेन नैकविधाः विषयाः सुष्ठु समायान्ति। यतो वैदिकसंस्कृतेः परिमार्जितस्वरूपं स्त्रीशूद्रादीनां कृते बहुधा प्रतिपत्तिजनकरीत्या अत्र उच्यते। अत्रोक्तधार्मिकसिद्धान्तानामाचारादिमार्गत्वेनोपदिष्टानां समेषां रहस्यानां समायोजितस्वरूपम् अभिहितत्वाद् स्मृतिशास्त्रमिदं बहुधा लोकोपयोगाय हिताय च प्रवर्तत इति नास्ति लेशमात्रमपि सन्देहस्यावकाशः।

पारिभाषिकशब्दाः

वैदिकसंस्कृतिः, दैवतवादः, प्रज्ञानं, स्मार्त्तकर्म, धृतिः, नृतम्

वैदिकसंस्कृतिः

वैदिकसंस्कृतिर्दैवतवादविश्वबन्धुत्ववसुधैवकुटुम्बकयाज्ञिकक्रियाविधिश्रौतस्मार्त्तकर्माणि नैतिकाध्यात्मिकोत्कर्षसंहिताब्राह्मणारण्यकोपनिषद्वेदाङ्गोक्तरहस्यानां तद्गतव्याख्यानञ्चाचारसंहितायाः माध्यमेन सर्वोत्कृष्टं दृष्टान्तं विदधाति। इयं संस्कृतिः **सा संस्कृति प्रथमा विश्ववारे**ति पदेन संहिताभागस्थमन्त्रवर्णैः बहुधा श्लाघ्यते। वैदिकसंस्कृतिर्बहुदैवतवादसिद्धान्तस्य सर्वोत्कृष्टमुदाहरणं यस्य च ग्रहणं स्मृत्यादिषु शास्त्रेषु बहुधा परिसेव्यते। यतो मन्वादिभिः स्मृतितत्त्वविशारदैस्तावच्छ्रुतिरेव गरीयसी तदाधारेण स्मृतिशास्त्राणि तत्प्रामाण्यपुरस्सरं बहुधा प्रादर्शी। अस्यां संस्कृतौ शुद्धसंस्कारस्य प्रत्येकं कर्मणि प्रमुखसाधनं मनुते। अतः अत्र बहुधा शास्त्रीयचिन्तनं पुरस्सरं मनसः प्रतिष्ठानिमित्तं तस्य च मनसः शोधनार्थे यजुर्वेदे तावन्मन्त्रराशिः सुतरां श्रूयते यत् -

यत्प्रज्ञानमुत चेतो धृतिश्च यज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किञ्च न कर्म क्रियते तन्मे मनः शिवसंकल्पमस्तु॥[1]

किञ्चात्र विश्वस्य सन्निधानाय ऐक्यसंस्थापनार्थाय बहुषु स्थलेषु ऐक्यभावनात्मकमन्त्राः दरीदृश्यन्ते। तस्मिन् मन्त्रराशौ बहुधा ऋत्विजामाचारसंहितायाः उपरि ध्यानं प्रदत्तं वर्तते। अतस्तावदत्र इयं संस्कृतिरेव सर्वेषामनुकरणीयत्वेन श्लाघ्यते।

वैदिकसंस्कृतेः संरक्षणम्

मनुस्मृतौ स्मार्त्तकर्मणि प्रत्येकं कर्मणां सम्पादनार्थं संस्काराणामावश्यकता तेषां च प्रतिपत्तिः सुतरां प्रदर्शितं वर्तते। अस्यां संस्कृतौ गर्भाधानादारभ्य अन्त्येष्टिं यावत् षोडशसंस्काराणां यथोचितवर्णनं शुद्धेः सर्वतोभावं दर्शयति। अतः सर्वस्मिन् संस्काराणां तात्पर्यं बहुधा श्लाघ्यते। अस्याः संस्कृतेः विशेषता बहुधा स्मार्त्तप्रक्रियायां प्रवर्तते। तदर्थं मनुना बहुधा संस्काराणामावश्यकतामनुभूय तेषां कालानुसारं प्रयोगविस्तरो विहितो वर्तते। संस्काराणामनुष्ठाने कर्माणि सुतरां साध्यन्ते।

तदर्थं कथ्यते मनुना द्वितीयाध्याये यत् -

यः कश्चित्कस्यचिद्धर्मो मनुना परिकीर्तितः ।
स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः॥[2]

सर्वप्रमाणातिरिक्तप्रमाणत्वेन श्रुतिः सर्वज्ञानमयत्वं विजहाति या च स्मार्त्तक्रियाविधेः आचारे च साक्षात् प्रमाणं तन्निसेवने धृतिक्षमादिगुणोपेतचित्तं सुतरां द्योतते।

सर्वं तु समवेक्ष्येदं निखिलं ज्ञानचक्षुषा ।
श्रुतिप्रामाण्यतो विद्वान्स्वधर्मे निविशेत वै॥[3]

सर्वप्रामाण्यातिरिक्तप्रमाण्यत्वेन श्रुतिः सर्वथा समेषां पथप्रदर्शकत्वेन बिभाति। अतः श्रुतिस्तु सदैव विप्रतिपत्तिनिमित्तमेकपक्षैकविचारमुपस्कृत्य तदभिधेयकतत्त्वराशिं विमृशति। अतः श्रुतिस्तु यश्च धर्मः प्रणोहति तद्धर्मो मानवैः सुतरां सेव्यमेव तदनुगुणतया स्मृत्याचारेषु उक्तेषु तत्त्वेष्वनुत्तमं सुखं प्राप्यते। श्रौतस्मार्त्त-विधैरनुष्ठीयमानो धर्मो सर्वथा कीर्त्तिमुपाश्रित्य पारलौकिकशान्तिं प्रददति।

श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः।
ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ॥[4]

वैदिकसंस्कृतेराधारो भवति याज्ञिकक्रियाविधिः दैवतवादश्च। आध्यात्मिकता अस्याः बहुधा महत्त्वं वैशिष्ट्यञ्च विदधाति। बहुषु मन्त्रराशिषु आध्यात्मिकचिन्तनस्योपरि केन्द्रितभावाः श्लाघनीयाः विद्यन्ते। यतो वैदिकशब्दराशिस्तावदत्र आध्यात्मिकचेतनायाः परमोत्कर्षसाधनार्थे प्रयुज्यते।

अग्नौ प्राप्ताहुतिः सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिः वृष्टेरन्नं ततः प्रज०।०ः॥[5]

अत्र यज्ञस्य प्रशंसायां बहुधा देवानां तृप्तिनिमित्तं विषयाः प्रोक्ताः सन्ति। अन्यच्च वैदिकसंस्कृतौ सर्वेषां देवानामैक्यविधानं वर्ण्यते। यद्यपि त्रयोस्त्रिंशत्संख्यकाः देवाः श्रुतौ बहुधा शास्त्रीयसिद्धान्तत्वेन ख्यायते तथापि तत्र एकत्वेन सर्वेषां प्रतिपत्तिः सुतरां ख्यायते। तदर्थं मन्त्रवर्णैः श्रूयते यत् इन्द्रादित्वेन बहूनां देवानामेकत्वे सन्निवेशो भवति।

इन्द्र मित्र वरुणमग्निमाहु रथो दिव्य स सुपर्णो गरुत्मान् ।
एकं सद् विप्रा बहुधा वदन्त्यग्निं यमं मातरिश्वानमाहुः॥[6]

स्मृतिशास्त्रे बहुधा श्राद्धादिकर्मणां नित्यनैमित्तिककाम्यादित्वेन श्रूयते। अस्याः संस्कृतेरपि आधारत्वेन वेदाः सुतरां प्ररोहन्ति। पितृश्राद्धादीनि कर्माणि सुतरां स्मृतौ मनुना बहुधा श्राद्धप्रकरणादिषु आचक्षते। तत्र पितृपुरुषाणां प्रशान्तिनिमित्त तदुद्देश्येन प्रदीयमानानि द्रव्याणि श्राद्धेति कथ्यते। तेन पितृपुरुषाः तृप्यन्ति यथेष्टमायुयशः कीर्त्तिं च प्रयच्छन्ति। अतो देवानां कृते अपि क्रियमाणे श्राद्धादिकर्मणि दानादिकर्मणि शुद्धिस्तदनु कर्माणि यानि प्रतिपादितानि सन्ति तानि सुतरां समेषां हिताय एव प्रवर्तते। तदर्थं वैदिकसंस्कृतौ अपि पितृणां तृप्तिविषयकोल्लेखो सुतरां दृश्यते। यतः कथ्यते तत्र -

पितृभ्यः स्वधायिभ्यः स्वधा नमः
पितामहेभ्यः स्वधायिभ्यः स्वधा नमः।
प्रपितामहेभ्यः स्वधायिभ्यः स्वधा नमः।[7]
पुनन्तु मा पितरः सोम्य०ासः पुनन्तु मा पितामह०ा०ः
पुनन्तु प्रपितामहाः पवित्रेण शतायुषा।[8]

अत्र पितृपुरुषाणां तृप्तिनिमित्तं कर्माणि विवक्षितानि सन्ति। यानि कर्माणि सम्पादने पितामहप्रपितामहाः सर्वे पवित्रेण तृप्यन्ति तथा शतायुर्भवितुं यशोयुक्तं च भवितुं पुनन्ति। तदर्थं वैदिकसंस्कृतेः इमां विशेषतामभिलक्ष्य स्मार्त्तपरम्परायां श्राद्धस्य महती चर्चा जाता। कालान्तरे अस्याः श्राद्धपरम्परायाः बहुधा निबन्धादिषु ग्रन्थेषु विस्तारो जातो वर्तते। तच्च श्राद्धं पितृणां पितामहानां देवानां तृप्तिनिमित्तं बहुधा व्यवस्थापनं क्रियते। अतः अस्याः संस्कृतेः विधिः वैदिकसंस्कृतौ प्रेरितो भूत्वा प्रवर्तते। यथोक्तं मनुना

दाराधिगमनं चैव विवाहानां च लक्षणम् ।
महायज्ञविधानं च श्राद्धकल्पं च शाश्वतम्॥[9]

अन्यच्च श्रूयते यत्-

पूर्वेद्युरपरेद्युर्वा श्राद्धकर्मण्युपस्थिते ।
निमन्त्रयेत त्र्यवरान्सम्यग्विप्रान्यथोदितान्॥[10]

शास्त्रान्तरेषु अस्याः संस्कृतेः अपि प्रतिध्वनिः श्रूयते। पुराणेषु अन्येषु स्मृतिग्रन्थेषु अपि वैदिकसंस्कृतेः पितृपुरुषाणां तृप्तिनिमित्तं क्रियमाणाणि कर्माणि जनानां हिताय आयुः वर्धने यशः कीर्त्तिश्चाभिवर्धने सहायकानि भवन्ति। यथोच्यते

यद् यद् द्रव्यं नरो तूष्णमादित्याय प्रयच्छति।
तत्तस्य शतसाहसमुत्पादयति भास्करः॥[11]

याज्ञवल्क्येन उक्तं यदस्मिन् सन्दर्भे आयुः प्रजाः धनं विद्याः स्वर्गं मोक्षमिहलोके सुखानि राज्यं धनं सर्वं पितृणां तृप्तिहेतुभूतं वर्तते। तेषां तृप्तिनिमित्तं सुतरां जनैः कर्माणि कर्त्तव्यानि भवन्ति।

आयुः प्रजां धनं विद्यां स्वर्ग मोक्षं सुखानि च।
प्रयच्छन्ति तथा राज्यं प्रीता नृणां पितामहाः॥[12]

अन्यच्च वर्ण्यते देवानां स्तुतिः मानवानां कल्याणाय सुतरां प्रवर्तते। देवानां साहचर्येण अपि लोके प्रजानां स्थितौ विविधानि परिवर्त्तनानि सुतरां समायान्ति। यतः सर्वेषां देवानां कृते इयं भावना सुतरां दृश्यते।

धाता रातिः सवितेदं जुषन्तां प्रजापतिर्निधिपा देवो अग्निः।

त्वष्टा विष्णुः प्रजया सं रराणो यजमानाय द्रविणं दधातु॥[13]

अस्यां वैदिकसंस्कृतौ सुतरां याज्ञिकक्रियाविधिः प्रयुज्यन्ते। याज्ञिककर्मणि सर्वं यागात्परिव्याप्तिर्भवतीति वैदिकशब्दराशिः सुतरां विजृम्भते। अतः सर्वं ब्रह्मयज्ञादिषु कर्माणि यागपरकतया प्रवर्तते। अतः कथ्यते

आयुर्यज्ञेन कल्पन्तां प्राणो यज्ञेन कल्पतां चक्षुर्यज्ञेन कल्पतां श्रौत्रं यज्ञेन कल्पतां। वाग्यज्ञेन कल्पतां मनो यज्ञेन कल्पन्तामात्मा यज्ञेन कल्पतां पृष्ठं यज्ञेन कल्पताम्। ब्रह्मयज्ञेन कल्पतां यज्ञो यज्ञेन कल्पतां ज्योतिर्यज्ञेन कल्पतां स्वर्यज्ञेन कल्पताम्।[14]

सर्वत्र ईश्वरस्य सार्वभौमिकतां दर्शयितुं वैदिकभागस्यान्तिमे उपनिषदि ईश्वरस्य जगत्कर्त्तृत्वं तस्य सर्वास्तिभावसिद्धान्तः सुतरां प्रतिपादितो वर्तते। यच्च मनुस्मृतौ मनुना अपि ईश्वरस्य सञ्चरणं सर्वत्र सर्वस्मिन् वर्तते इति सिद्धान्तत्वेन प्रतिपादितं वर्तते।

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।

तेन त्यक्तेन भुञ्जीथा मा गृधः कस्य स्वीद्धनम्॥[15]

तत्रैव धर्मशब्दस्य सत्यार्थानुसन्धानाय प्रवर्तते। यच्चानुसन्धानकर्मणि धर्मस्य निहितार्थं प्रोद्घाट्य तत्रैव तस्य सत्यधर्मत्वं बहुधा परिव्याप्तं वर्तते।

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्।

तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये॥[16]

अतस्तावद् वैदिकधर्मतया स्मार्तकर्मणि अस्याः संस्कृतेः विन्यासो वहुधा प्राप्यते। या च संस्कृतिविश्वसाहित्ये प्रथमा आद्या इति प्रथते। चातुर्वर्ण्यानां कर्माणि अत्र बहुधा वेदेषु स्पष्टीकृतानि वर्तन्ते। तानि कर्माणि सुतरां प्रथमानि भवन्ति। पुरुषसूक्ते अस्मिन् प्रसङ्गे बहुधा उक्तं वर्तते। अस्याः वैदिकसंस्कृतेराधारत्वेन यागाः प्रवर्तन्ते। अतः मनुरपि अस्याः संस्कृतेः निर्वाहकत्वेन मनुस्मृतेः पदे पदे वैदिकशब्दराशिषु यथाक्रमं यथास्थितिः सर्वं प्रतिपादितं तत् सर्वं शास्त्रे उक्तं वर्तते। श्रुतौ यागादिरेव धर्मः इति धर्मसिद्धान्तः प्रतिपादितो वर्तते स्मृतौ तस्य धर्मस्य परिपालनात्मकभावधारा प्राप्यते। यच्च कथ्यते -

यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा।

यज्ञश्च भूत्यै सर्वस्य तस्माद् यज्ञे वधोऽवधः॥[17]

यथोक्तं मनुना अत्र यागस्य सिद्धिनिमित्तं यज्ञार्थमेव पशवो भवन्ति सृष्टाः चतुर्मुखेन ब्रह्मणा। अतो विधिप्रणीतयाज्ञिककर्मणि सर्वहिंसामपि अहिंसात्वेन कल्प्यते। यज्ञो जन्तूनां हिताय पार्थिवानां योगक्षेमसाधनभूततत्त्वानां निर्णयाय च प्रवर्तते। अतः वैदिकहिंसा हिंसा न भवतीति सिद्धान्तः सुतरां प्रोच्यते।

यज्ञार्थं ब्राह्मणैर्वध्या प्रशस्ता मृगपक्षिणः।

भृत्यानां चैव वृत्यर्थमगस्त्यो ह्याचरत् पुरा॥[18]

अन्यच्च तत्रैव मनुस्मृतौ दृष्टान्तत्वेन अयं श्लोकराशिः प्राप्यते यत् प्राणिनः सर्वे यज्ञार्थं समुत्पन्नाः अभूवन्। यज्ञसिद्धिनिमित्तं तेषामात्मबलीदानमपि श्रेयं मनुते। प्राचीनानां मुनीनां मतानि पुरस्कृत्य तेषामपि अगस्त्यादीनां नामानि अत्र मनुना स्वीकृतमेव। अतो भृत्यादीनां वृत्तिनिमित्तं यागसिद्धिनिमित्तं वा सर्वे प्राणिनः प्रशस्ताः वध्याश्च भवितुं युक्ताः।

ओषध्यः पशवो वृक्षास्तिर्य्यक् च पक्षिणस्तथा।

यज्ञार्थं निधनं प्राप्ताः प्राप्नुवन्त्युत्सृतीः पुनः॥[19]

उपसंहारः

पदे पदे मनुस्मृतौ वैदिकसंस्कृतेराधारभूतसिद्धान्तानां वर्णनं विदधाति। अन्यच्च शास्त्रेषु वेदस्य आद्यत्वं सर्वप्रामाणिकत्वं बहुधा स्मृतौ स्मर्यते। यतः कथ्यते तत्र यो जन्तुः वेदाननधीत्य अन्यत्र कर्माणि सम्पादयति स जीवनं यावत् शूद्रत्वेन जीवति। कर्ममात्रेण संस्कारमात्रेण तस्य आधिपत्यमुपजायते। यतः कर्म एव मानवानामिहलोके परलोके च विविधेषु क्षेत्रेषु नैकानां गुणानां प्रशस्तिनिमित्तं सुतरामुपजायमानो वर्तते। यतः कथ्यते मनुस्मृतौ यत्

तपोविशेषैर्विविधैर्व्रतैश्च विधिचोदितैः ।

वेदः कृत्स्नोऽधिगन्तव्यः सरहस्यो द्विजन्मना ॥[20]

वेदं एव सदाभ्यस्येत्तपस्तप्स्यन्द्विजोत्तमः ।

वेदाभ्यासो हि विप्रस्य तपः परं इहोच्यते ॥[21]

संसारे तपः एव सर्वस्वभूतो वर्तते कस्यचिन्नरस्य परन्तु सर्वेषां मुख्यकर्माणि एव तपो वर्तते यथा ब्राह्मणस्याध्ययनमध्यापनयजनयाजनादीनि भवन्ति तद्वत् क्षत्रियस्याध्ययनं प्रजारक्षणं वैश्यस्य कृषिकर्माणि पशुपालनं शूद्रस्य द्विजातीनां शुश्रूषेति यथोक्तं तद्वत् विप्रस्य वेदाध्ययनं परमं श्रेष्ठं च तपो वर्तते इति सुतरां ख्यायते। अतो द्विजैः सर्वदा वेदाभ्यासो विधातव्यो वर्तते। सरहस्यं वेदस्याध्ययने द्विजस्य परमं तपः श्रेष्ठाचरणञ्च वर्तते। तपो विशेषैः व्रतविशेषस्य च प्रतिपत्तिर्बहुधा परिलक्ष्यते। तदर्थं श्रुतेः सार्थकतां दर्शयितुं मनुः ब्रवीति यत्-

आ हैव स नखाग्रेभ्यः परमं तप्यते तपः ।

यः स्रग्व्यपि द्विजोऽधीते स्वाध्यायं शक्तितोऽन्वहम् ॥[22]

योऽनधीत्य द्विजो वेदं अन्यत्र कुरुते श्रमम् ।

स जीवन्नेव शूद्रत्वं आशु गच्छति सान्वयः ॥[23]

अत्र वेदस्य पठनं सुतरां द्विजैः परमं श्रेष्ठं च कर्त्तव्यमिति बोधनं सुतरां ख्यायते। अतः द्विजो ब्रह्मचारी वा नित्यं सायंप्रातः अग्निष्टोमादिकर्माणि सम्पाद्य वेदस्य नित्याध्ययनशीलत्वं सुतरां सम्पादयेत्। वेदस्य नित्यत्वं पारलौकिककर्मसु नियततरं कर्माणि अत्र प्रसाध्यन्ते। अतो वेदाध्ययनं सुतरां समेषां परमं कर्त्तव्यमिति बोधो सुतरां ख्यायते। वेदानामध्ययनं सार्थैः साङ्गैः सह च कर्त्तव्यमिति बहुधा श्लाघ्यते। अतो वेदाभ्यासः एव द्विजानां परमं तपः यं च लब्ध्वा जन्तु इहलोकात्परलोकं प्रति बहुधा शान्तिमवाप्तये प्रयतते। तदर्थं वेदस्य स्वाध्यायो विहितार्थो द्योतते।

अतः इदं स्पष्टं वक्तुं शक्यते यत् स्मृतिशास्त्राणि आनुषङ्गिकतया वैदिकसंस्कृतेः संरक्षणं परिरक्षणमभिदधते। मनुस्मृतौ उक्तानां नैतिककर्त्तव्यबोधानां संस्काराणां संस्कृतीनाञ्चोपरि वैदिकधर्मस्य प्रभावः सुतरां पतति। अन्यच्च अत्रोक्तानां सर्वक्रियाविधीनामुल्लेखो वैदिकक्रियायाः विन्यासनिमित्तं प्रवर्तत इति।

सन्दर्भग्रन्थसूची

१. मनुस्मृतिः - मन्वर्थमुक्तावली सहिता, चौखम्बा संस्कृत सीरीज आफिस्, वाराणसी, १९७०

२. काण्वसंहिताभाष्यम्, वैदिकसंशोधनमण्डल, पुने, १९९२

३. ऋग्वेदसंहिता, वैदिक यन्त्रालय, अजमेरनगर, १९५७

४. याज्ञवल्क्यस्मृतिः - मिताक्षरासहिता, नागप्रकाशक, दिल्ली, २०११

५. धर्मशास्त्रेतिहासः - प्रो.जयकृष्णमिश्रः, चौखम्बा संस्कृत सीरीज आफिस, वाराणसी, २०१०

६. वसिष्ठधर्मसूत्रम् - भण्डारकरप्राच्यविद्यासंशोधनागारः, पुण्यपतनम्, १९३०

७. संस्कृतवाङ्मयकोशः -श्रीधरभास्करवर्णकर, वाणी पब्लिकेशन् राजस्तान

सङ्केताक्षरसूची

1. माध्या. सं. ३४..१.३
2. मनु.२.७
3. मनु.२.८
4. मनु.२.१०
5. मनु. ३.७६
6. ऋ.सं. १.१६४.४६
7. का. सं. २१.३.५
8. का. सं. २१.३.७
9. मनु. १.११२
10. मनु. ३.१८७
11. श्रा. सा. १४
12. या. स्मृ. १.२७०
13. का. सं. ९.३.३
14. . सं. १९.९.३
15. का.सं ४०.१.१
16. का. सं. ४०.१.१५
17. मनु. ५-३९
18. मनु. ५. २२
19. मनु. ५. ४०
20. मनु. २.१६५
21. मनु. २.१६६
22. मनु. २.१६७
23. मनु. २.१६८